# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२)

२६.०७.२०११

- द्रुह जिघांसायाम् ।
- मुह वैचित्त्ये ।
- ष्णुह उद्गिरणे ।
- ष्णिह प्रीतौ ।
- एतेषां धातूनां क्विपि कृते कृदन्तत्वात् प्रातिपदिकत्वम् ।
- 'द्रुह्' इत्यस्य दादित्वात् नित्यं घत्वे प्राप्ते, अन्येषां नित्यं ढत्वे प्राप्ते,

# ३२७. वा द्रुहमुहष्णुहष्णिहाम् (८.२.३३)

- पदद्वयम् । वा, द्रुह-मुह-ष्णुह-ष्णिहाम् ।
- 'झलो झलि' (८.२.२६) इत्यतः 'झलि' इति, 'स्कोः संयोगाद्योरन्ते च' (८.२.२९) इत्यतः 'अन्ते' इति, 'हो ढः' (८.२.३१) इत्यतः 'हः' इति, 'दादेर्धातोर्घः' इत्यतः 'घः' इति च अनुवर्तते । 'पदस्य' (८.१.१६) इत्यधिक्रियते ।
- एषां हस्य वा घः स्यात् झलि पदान्ते च ।
- पक्षे ढः ।
- ध्रुक् / ध्रुग् / ध्रुट् / ध्रुड् ।
- द्रुहौ, द्रुहः ।

ঌ ध्रुग्भ्याम् / ध्रुड्भ्याम् ।

ঌ ध्रुक्षु / ध्रुट्त्सु / ध्रुट्सु ।

ঌ एवं मुहष्णुहष्णिहाम् ।

- विश्वं वहति
- विश्वं वह् (ण्वि) व् ('वहश्च' - ३.२.६४ - इति ण्विप्रत्ययः)
- विश्वं वाह्  व्  ('अत उपधायाः' - ७.२.११६ - इति उपधावृद्धिः)
- विश्वं वाह्  ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)
- विश्व अम् वाह्  ('उपपदमतिङ्' - २.२.१९ - इति समासः)
- विश्ववाह्  ('सुपो धातुप्रातिपदिकयोः' - २.४.७१ - इति सुब्लोपः)
- विश्ववाह्  ('कृत्तद्धितसमासाश्च' - १.२.४६ - इति प्रातिपदिकसंज्ञा)

- विश्ववाह्  (सुँ) स्
- विश्ववाह्  ('हल्ङ्याब्भ्यो...' - ६.१.६८ - इति सुलोपः)
- विश्ववाढ्  ('हो ढः' - ८.२.३१ - इति ढत्वम्)
- विश्ववाड्  ('झलां जशोऽन्ते' - ८.२.३९)
- विश्ववाट्  ('वाऽवसाने' - ८.४.५६)

- विश्ववाहौ, विश्ववाहः

- विश्ववाह्  (शस्) अस्

# ३२८. इग्यणः सम्प्रसारणम् (१.१.४५)

- पदत्रयम् । इक्, यणः, सम्प्रसारणम् ।
- संज्ञासूत्रम् ।
- यणः स्थाने प्रयुज्यमानः यः इक् सः संप्रसारणसंज्ञः स्यात् ।

# ३२९. वाह ऊठ् (६.४.१३२)

- पदद्वयम् । वाहः, ऊठ् ।
- ‘भस्य’ (६.४.१२९) इत्यधिकारः । ‘वसोः सम्प्रसारणम्’ (६.४.१३१) इत्यतः ‘सम्प्रसारणम्’ इत्यनुवर्तते ।
- भस्य वाहः संप्रसारणम् ऊठ् स्यात् ।

- विश्ववाह्  अस् (‘यचि भम्’ - १.४.१८ - इति भसंज्ञा)
- विश्व ऊ आह्  अस्  (‘वाह ऊठ्’ - ६.४.१३२ - इति वकारस्य ऊठ्)

# ३३०. संप्रसारणाच्च (६.१.१०८)

- पदद्वयम् । संप्रसारणात्, च ।
- 'इको यणचि' (६.१.७७) इत्यतः अचि इति, 'अमि पूर्वः' (६.१.१०७) इत्यतः 'पूर्वः' इति च अनुवर्तते । 'एकः पूर्वपरयोः' (६.१.८४) इत्यधिक्रियते ।
- संप्रसारणाद् अचि पूर्वरूपम् एकादेशः स्यात् ।

- विश्व ऊ आह् अस्
- विश्व ऊह् अस् ('संप्रसारणाच्च' - ६.१.१०८)
- विश्वौह् अस् ('एत्येधत्यूठ्सु' - ६.१.८९ - इति वृद्धिः)
- विश्वौहः (रुत्व-विसर्गौ)

विश्वौहा विश्ववाड्भ्याम् इत्यादि ।

छन्दस्येव ण्विः इति पक्षे णिजन्ताद् विच् ।

# हकारान्तः पुँल्लिङ्गः विश्ववाह्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | विश्ववाट्/विश्ववाड् | विश्ववाहौ | विश्ववाहः |
| | हे विश्ववाट्/ हेविश्ववाड् | हे विश्ववाहौ | हे विश्ववाहः |
| | विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| | विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| | विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| | विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| | विश्वौहः | विश्वौहोः | विश्वौहाम् |
| सप्तमीविभक्तिः | विश्वौहि | विश्वौहोः | विश्ववाट्त्सु/विश्ववाट्सु |

हलादिषु प्रत्ययेषु ‘हो ढः’ इति ढत्वम् । जश्त्वम्

भसंज्ञायाम् ‘वाह ऊठ्’ इति संप्रसारणम्

सुपि ढत्वजश्त्वयोः कृतयोः वा धुडागमः

- हकारान्तः पुंलिङ्गः 'अनडुह्' शब्दः (अनः = शकटं वहति । वृषभः इत्यर्थः)
- अनडुह्  (सुँ) स्

# ३३१. चतुरनडुहोरामुदात्तः (७.१.९८)

- पदत्रयम् । चतुर्-अनडुहोः, आम्, उदात्तः ।
- 'इतोऽत् सर्वनामस्थाने' (७.१.८६) इत्यतः 'सर्वनामस्थाने' इत्यनुवर्तते ।
- अनयोः आम् स्यात् सर्वनामस्थाने परे, स च उदात्तः ।

# ३३२. सावनडुहः (७.१.८२)

- पदद्वयम् । सौ, अनडुहः ।
- 'आच्छीनद्योर्नुम्' (७.१.८०) इत्यतः 'आत्' इति, 'नुम्' इति च अनुवर्तते ।
- अस्य नुम् स्यात् सौ परे ।
- 'आत्' इत्यधिकाराद् अवर्णात् परोऽयं नुम् ।
- अतः विशेषविहितेनापि नुमा आम् न बाध्यते । [चतुरनडुहोरामुदात्तः (७.१.९८)]
- अमा च नुम् न बाध्यते ।[अम् सम्बुद्धौ (७.१.९९)]

- अनडुह्  स्
- अनडु आ ह्  स् (‘चतुरनडुहोरामुदात्तः’ - ७.१.९८ - इति अन्त्यादचः परः आमागमः)
- अनड्वाह्  स्  (‘इको यणचि’ - ६.१.७७)
- अनड्वान् ह्  स्  (‘सावनडुहः’ - ७.१.८२ - इति आत् परः नुमागमः)
- अनड्वान्  ह्  (‘हल्ङ्याब्भ्यो…’ - ६.१.६८ - इति सुलोपः)
- अनड्वान्  (‘संयोगान्तस्य लोपः’ - ८.२.२३)
- नुम्विधानसामर्थ्यात् ‘वसु-स्रंसु…’ इति दत्वं न ।
- संयोगान्तलोपस्य असिद्धत्वात् नलोपो न (नलोपः प्रातिपदिकान्तस्य - ८.२.७)

# ३३३. अम् सम्बुद्धौ (७.१.९९)

- पदद्वयम् । अम्, सम्बुद्धौ ।
- ‘चतुरनडुहोरामुदात्तः’ (७.१.९८) इत्यतः ‘चतुरनडुहोः’ इत्यनुवर्तते ।
- चतुरनडुहोः अम् स्यात् सम्बुद्धौ ।
- आमः अपवादः ।

- हे अनडुह् स्
- हे अनडु अ ह् स् (‘अम् सम्बुद्धौ’ - ७.१.९९ - इति अन्त्यादचः परः अमागमः)
- हे अनड्वह् स् (‘इको यणचि’ - ६.१.७७)
- हे अनड्व न् ह् स् (‘सावनडुहः’ - ७.१.८२ - इति आत् परः नुमागमः)
- हे अनड्वन् ह् (‘हल्ङ्याब्भ्यो...’ - ६.१.६८)
- हे अनड्वन् (‘संयोगान्तस्य लोपः’ - ८.२.२३)

अनडुह्  औ
अनडु आ ह् औ ('चतुरनडुहोरामुदात्तः' - ७.१.९८ - इति आमागमः)
अनड्वाहौ ('इको यणचि' - ६.१.७७)

अनड्वाहः ।

अनडुहः ।
शसि सर्वनामस्थानत्वाभावेन आम् न ।

# ३३४. वसुस्रंसुध्वंस्वनडुहां दः (८.२.७२)

- पदद्वयम् । वसु-स्रंसु-ध्वंसु-अनडुहाम्, दः ।
- ‘पदस्य’ (८.१.१६) इत्यधिकारः । ‘ससजुषो रुः’ (८.२.६६) इत्यतः ‘स’ इत्यनुवर्तते ।
- सान्तवस्वन्तस्य स्रंस्वादेश्च दः स्यात् पदान्ते ।

- अनडुह् भ्याम्
- अनडुद् भ्याम् (‘वसुस्रंसु...’ - ८.२.७२)
- अनडुद्भ्याम् ।

- सान्त इति किम्?
- विद्वान्
- पदान्त इति किम्?
- स्रस्तम् । ध्वस्तम् ।

# हकारान्तः पुँल्लिङ्गः अनडुह्-शब्दः

सौ 'सावनडुहः' इति आत् परः नुमागमः

सर्वनामस्थानेषु आमागमः (सम्बुद्धौ अम्)

| | | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | अनड्वान् | अनड्वाहौ | अनड्वाहः |
| | हे अनड्वन् | हे अनड्वाहौ | हे अनड्वाहः |
| | अनड्वाहम् | अनड्वाहौ | अनडुहः |
| तृतीयाविभक्तिः | अनडुहा | अनडुद्भ्याम् | अनडुद्भिः |
| चतुर्थीविभक्तिः | अनडुहे | अनडुद्भ्याम् | अनडुद्भ्यः |
| पञ्चमीविभक्तिः | अनडुहः | अनडुद्भ्याम् | अनडुद्भ्यः |
| षष्ठीविभक्तिः | अनडुहः | अनडुहोः | अनडुहाम् |
| सप्तमीविभक्तिः | अनडुहि | अनडुहोः | अनडुत्सु |

हलादिषु प्रत्ययेषु 'वसुस्रंसु...' इति दत्वम्

# हकारान्तानां प्रयोगाः

- कृष्णाङ्घ्रिपद्ममधुलिण्न पुनर्विसृष्ट-मायागुणेषु रमते वृजिनावहेषु ।
  (श्रीमद्भागवतम् - ६.३.३३)
- एकः शब्दः सुष्ठु ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग्भवति (महाभाष्यम् - पस्पशाह्निकम्)
- कामात्मा प्राज्ञमानी च मित्रध्रुक् सर्वशङ्कितः ।
  अकर्ता चाकृतज्ञश्च त्यक्तधर्मः प्रियानृतः ॥ (महाभारतम् - ५.५४.९०.०.४)
- तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयम् ।
  अथ वाऽस्य पदाम्भोजमकरन्दलिहां सताम् ॥ (श्रीमद्भागवतम् - १.१६.६)

य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ।
द्रुह्यत्यज्ञः पृथग्दृष्टिः तत्त्वतो विमुखो भवेत् ॥ (श्रीमद्भागवतम् - ४.२.२१)

तस्याथ कामधुग्धेनुः वसिष्ठस्य महात्मनः ।
उक्ता कामान् प्रयच्छेति सा कामान् दुदुहे ततः ॥ (महाभारतम् - १.११.१६५.५.९)

अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् (श्रीमद्भागवतम् - १०.५.३२)

सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्तिं महतीम् अवाप्स्यति ।
(श्रीमद्भागवतम् - ४.४.३०)

अनड्वाहं सुव्रतं यो ददाति हलस्य वोढारमनन्तवीर्यम् ।
धुरन्धरं बलवन्तं युवानंप्राप्नोति लोकान् दश धेनुदस्य ॥ (महाभारतम् - ३.३७.१८४.०.१०)